अन्तर्राष्ट्रीय हिन्दी एवं सामाजिक विज्ञान शोध पत्रिका
Peer Reviewed Refereed शोध पत्रिका
ISSN: 2348–2605 Impact Factor: 6.789 Volume 10-Issue 4, (October-December 2022)

# योगनये धर्मादित्रयपरिणामविचारः

**डा.अशोक कुमार मीणा**
**सह-आचार्यः शाखाध्यक्षश्च**
**सांख्ययोगविद्याशाखा, पुरी परिसर**

योगसाधनेन प्राप्यसिद्धीनां विचारप्रसङ्गे धारणाध्यानसमाधिविशिष्ट- संयमस्य विषयसिद्ध्यर्थं क्रमशः निरोध-समाधिः एकाग्रतारूपपरिणामत्रयाणां वर्णनं दृश्यते। तेषु निरोधादिपरिणामानां परिणमनकालविषये मतद्वयं समुपलभ्यते।

तत्र प्रथमपक्षे वाचस्पतिमिश्रः[1] रामानन्दयति[2] नारायणतीर्थः[3] सदाशिवेन्द्रसरस्वती[4] हरिहरानन्दारण्यकम्[5]। बलदेवामिश्रा[6] द्याचार्याणाम- न्तर्भावः। एतेषां मते सम्प्रज्ञातसमाधेः प्रारम्भिकावस्थायां चित्तस्य समाधिपरिणामः सुहृदावस्थायां चित्तस्यैकाग्रतापरिणामः असंप्रज्ञातसमाध्यवस्थायञ्च चित्तस्य निरोधपरिणामः जायते।

द्वितीयपक्षे विज्ञानभिक्षु भावागणेशः[7] योगसिद्धान्तचन्द्रिकाकारः[8] नागेशभट्टः[9] दीनामन्तर्भावः। एतेषां मते योगः समाधेः साक्षात्फलम्। चित्तस्यैकाग्रताविशेषस्तु समाधिः।

---

1. क. असम्प्रज्ञातं समाधिमपेक्षस्य सम्प्रज्ञातो व्युत्थानम्, निरुद्धनेऽनेनेति निरोधः - ज्ञानप्रसादः परं वैराग्यम्....इति। त.वै.,पृ. 290।ख)सम्प्रज्ञातसमाधिपरिणामावस्थां चित्तस्य दर्शयति, इति । तत्र , पृ. 291।ग) ततः पुनः समाधेः पूर्वापरीभूताया अवस्थाया निष्पत्तौ... इति । तत्र, पृ. 292।
2. क)परवैराग्यरूपवृत्त्याः..सन्निर्बीजनिरोधपरिणाम, इति। म.प्र., पृ. – 53।ख) एवं निर्बीजावस्थामुक्त्वा सम्प्रज्ञातपरिणाममाह, इति। तत्रैव। तत्र यदा व्युत्थानाऽभिभवोः ...चित्तं भवति, इति। सू. बो., पृ.36।
3. तत्र यदा व्युत्थानाभिभवो... चित्तं भवति, इति । सू.बो.,पृ. 36
4. क)सोऽयमीदृश्यश्चित्तस्य निरोधपरिणामो निर्बीजः समाधिर्भवति, इति । यो. सू.पृ. 59। ख) इत्थं निरोधपरिणामरूपं निर्बीजसमाधिमभिधाय सम्प्रज्ञातसमाधिपरिणाममभिधातुमाह, इति। तत्र, पृ. 60।
5. क) निरोधचित्तम् , प्रत्ययशून्यंचित्तम्, इति। भा. , पृ. 289।ख) सर्वार्थताहीनसमाधिस्वभावेन....समाधिपरिणाम, इति । .तत्र , पृ. 292।ग) ततः – तदा समाधिकाले पुनरन्यो यः परिणामस्तल्लक्षणमाह, इति। तत्रैव।
6. चित्तस्य सम्प्रज्ञातसमाधिपरिणामावस्थां दर्शयति। इति । यो.सू.,पृ. 58
7. तत्रादावङ्गसमाध्यवस्थातोऽङ्गियोगयोरवस्थायां विशेषमाह, इति।- भा.ग.वृ.,पृ. 62
8. तदेवं योगतदङ्गतयोः परिणामवैलक्षण्यं तयोर्विवेकाय प्रदर्शितम्, । इति – यो. सि. च. , पृ. 111

ISSN: 2348–2605 Impact Factor: 6.789 Volume 10-Issue 4, (October-December 2022)

प्रारम्भिकावस्थायां तत्त्ववस्तु प्रति चित्तस्य केन्द्रिकरणं समाधिपरिणामः, विक्षेपकण्टकितत्वात्। उत्कविक्षेपशून्यतत्त्वम्प्रति एकान्ततः केन्द्रिकरणं चित्तस्यैकाग्रतापरिणामः। एतौ द्वौ चिन्तनात्मकत्वात् परोक्षवृत्त्यात्मकौ। एकाग्रतापरिणामस्य फलं योगः, चः खलि वृत्तिनिरोधात्मकः। एवं समाधिपरिणाम एकाग्रतापरिणामयोः योगेसाधने अन्तर्भावः । योगस्तु निरोधपरिणाम इति।

उपयुक्तपक्षद्वये प्रथममतं सूत्रभाष्यानुरूपत्वात् युक्तियुक्तमित्यस्माकमभि- मतम्। प्रसङ्गेऽस्मिन् वृत्तिकारस्य मतमस्पष्टं प्रतिभाति।

**१.निरोधपरिणामः**

सूत्रकारमतेन निरुद्धवस्थाविशिष्टचित्तस्य व्युत्थानात्मकसंस्कारणाम- भिभवः निरोधात्मकसंस्काराणां क्रमशः प्रादुर्भावश्च। एवं चित्तस्य केवलं संस्कारेण सह सम्बन्धः निरोधपरिणामः[10] निरोधपरिणामस्य प्रथमपरिणामद्वयेन सह अंशतोऽपि समानता नास्ति। निरोधपरिणामे चित्तस्य वृत्त्यात्मकपरिणामः नास्ति, अपि तु निरुद्धजातीयसंस्काराणां क्रमशः ह्रासवृद्धिर्जायते। एवं साधनेन चित्तस्य परिणामक्रिया क्रमशः सूक्ष्मा सूक्ष्मतरा सूक्ष्मतमा च जायते।

वृत्तिकारमतेन व्युत्थानसंस्कारधर्माणां तिरोभावेन निरोधसंस्कारा-णामाविर्भावन च संस्कारद्वयेन सह धर्मिरूपतया सम्बन्धसत्त्वेऽपि चित्तं स्थिरं प्रतीयते। त्रिगुणात्मिकायाः प्रकृतेः परिणामत्वात् रजोगुणश्च सदैव प्रवृत्त्यात्मकत्वादस्थिरमपि चित्तं स्थिरं निश्चलं प्रतीयते[11]। एवं निरोधकाले चित्तस्य व्युत्थाननिरोधोभयवृत्तियुक्तत्वात् निरोधवस्थानसंस्कारैः साकं सम्बन्धः निरोधपरिणाम[12] इत्युच्यते।

व्युत्थाननिरोधसंस्कारयोः पारस्परिकयुद्धे व्युत्थानसंस्काराणामभिभवं निरोधसंस्कराणां प्रादुर्भावञ्च प्रदर्शयन् धर्मिभूतचित्तस्य प्रशान्त-वाहिन्यवस्था[13]। नाम विक्षेपाणां परित्यागपूर्वकं सदैव ध्येयाकारपरिणाप्राप्तिः निरोधपरिणामस्य फलमिति[14]।

**२.समाधिपरिणामः-**

---

9. क) अथाङ्गसमाधिकालिकचित्तपरिणामापेक्षया... कीदृश तत्राह, इति। - ना.बृ.वृ.,पृ.320। ख) इदानीं निरोधरूपयोगद्वयपरिणामापेक्षया विलक्षणं योगाङ्गसमाधिकार्यं परिणाममाह, इति। तत्रैव।

10.व्यत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भाभौ निरोधक्षणचित्तान्वयो निरोधपरिणामः, इति। यो.सू., 3.9। इति।

11. यदा व्युत्थानसंस्काररूपोः ... स्थैर्य्यमुच्यते, इति। रा.मा. वृ., ३.९।

12. निरोधक्षणे चित्तस्योभयक्षणवृत्तित्वादन्वयो यः स निरोधपरिणाम उच्यते। इति। तत्रैव।

13. तस्य प्रशान्तबाहिता संस्कारात् , इति। यो. सू., ३.१०।

14. तस्य चेतस्य ..... चित्तं भवति, इति। रा.मा.व-., २.१०।

ISSN: 2348–2605 Impact Factor: 6.789 Volume 10-Issue 4, (October-December 2022)

यदा साधकस्य चित्तं प्रयत्नपूर्वकं क्षिप्तादिभूमिं परित्याज्य एकाग्रभूमौ प्रवेशति तदा चित्तस्य सार्वविषयाभिमुखिधर्माः क्रमशः दुर्बलाः भवन्ति। एकविषयाभिमुखिधर्माश्च क्रमशः प्रबलाः भवन्ति[15]। एवं व्युत्थानरूप-वृत्तिधर्माणां तिरोभावैः एकविषयाकारवृत्तिधर्माणां प्रादुर्भावैश्च चित्तस्यान्वयः समाधिपरिणाम[16]। वृत्तिकारमतेन सर्वार्थतैकाग्रतसंस्कारयोः क्रमशः क्षयोदयात् प्रवृद्धसत्त्वगुणविशिष्टचित्तस्य ध्येयविषयेण सहैकाकार-रूपेणानवस्थान समाधिपरिणाम[17] अयं भेदः निरोधपरिणामात्समाधि-परिणामस्य यत् निरोधपरिणामे व्युत्थाननिरोधसंस्कारयोः प्रथमस्यात्यन्त-तिरस्कृतत्वादुत्तरस्य निरोधसंस्कारस्यानभिभूतरूपेणावस्थानात् क्रमशः तिरोभावाविर्भावौ भवतः। समाधिपरिमामे तु सर्वार्थतैकाग्रतासंस्कारयोः विक्षेपवृत्तिसंस्काराणां विलयादेकाग्रतालक्षणसंस्काराणामुत्पन्नत्वात् क्षयोदयो भवतः[18]।

**३.एकाग्रतापरिणामः-**

विक्षेपाणां परित्यागपूर्वकमेकाग्रदशाप्राप्तिः चित्तस्य समाधिपरिणामः, यस्योत्पत्तिः संप्रज्ञातसमाधेः प्रारम्भिकदशायां जायते। परन्तु सम्यग्रूपेण समाहिते चेतसि सम्पन्नः परिणामः एकाग्रतापरिणाम इत्युच्यते। एकाग्रतापरिणामावस्थायां शान्तोदितवृत्तीनां न तु वृथग्रूपेण प्रतीतिः अपितु उभयोरेकरूपतया नाम अभेदरूपेणावस्थानं[19] सजातीयैकैकवृत्तीनां विनाशः सजातीयवृत्त्यन्तराणा- ञ्चोत्पत्तिः यस्मिन् समये जायते। सः चित्तस्य एकाग्रतापरिणा इत्युच्यते। इयं तु सम्परज्ञातसमाधे परिपक्ववस्थायां सम्भवति। समाहितचित्तस्य पूर्वप्रत्ययः शान्तः, तत्सदृशोत्तरप्रत्ययश्चोदितः[20]। तौ द्वावप्येकस्य सजातीयध्येयपदार्थस्योश्रयौ। एवं समाहितचित्तस्योभयत्रावस्थानां चित्तस्यैकाग्रतापरिणाम[21] इति। अयं भेदः समाधिपरिणाम एकाग्रताप- रिणायोर्मध्ये यत् समाधिपरिणामावस्थायां व्युत्थानैकाग्रतारूपेण वृत्तिद्वययोः एकाग्रतापरिणामावस्थायां तु केवलं एकाग्रतावृत्तेः कालभेदेन क्रमशः आर्विभावतिरोभावौ भवतः। समाधि-एकाग्रनिरोधरूपचित्तस्य परिणामत्रय-वर्णनेन शब्दादिपञ्चतन्मात्रेषु सूक्ष्ममहाभूते-ष्वाकाशादिपञ्चस्थूलमहाभूतेषु बुद्धिकर्मान्तःकरणभेदेनावस्थिते- षेवेकादशेन्द्रियेषु

---

15. सर्वार्थतैकाग्रतयो क्षयोदयौ चित्तस्य समाधिपरिणामः इति। यो.सू., ३.११।

16. सर्वार्थता– युगपदिव सर्वौन्द्रियेषु विषयग्रहणाय सञ्चरणशीलता, एकाग्रता - एकविषयता, अनयोर्धर्मयोः क्षयोदयरूपः परिणामः समाधिपरिणामः, इति । - बा., पृ, २९१-२९२। इति

17. सर्वार्थताः...समाधिपरिणाम इत्युच्यते, इति । रा.मा.वृ., ३.११।इति।

18. तत्र संस्कारलक्षणयोः ... वर्तमानेऽध्वनि प्रकटत्वम्, इति। तत्रैव।

19. ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः, इति। - यो. सू., ३.१२।

20. व्या.भा., - ३. १२

21. समाहितस्यैव...एकाग्रतापरिणाम इत्युच्यते, इति । रा.मा.वृ., ३.१२

ISSN: 2348–2605 Impact Factor: 6.789 Volume 10-Issue 4, (October-December 2022)

धर्मलक्षणणावस्थारूपेण परिणामत्रयाणां सामान्यरूपेण वर्णनं सञ्जातम्[22]। परिणामत्रयाणां सम्भन्धविषये योगसूत्रभाष्यव्याख्याकाराणां मते वैमत्यं न दृश्यते। केवलं विषयेऽस्मिन् लघुवृत्तिग्रन्थेषु संक्षेपेण भाष्यव्याख्यानग्रन्थेषु च विस्तुतरूपेणँ वर्णनं समुपलभ्यते।

अत्र शङ्का जायते कोऽयं परिणाम इति। तत्रोच्यते– अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः[23] इति। परिणामत्रयाणां स्वरूपविषये वृत्तिकारेणोक्तं यत् विद्यमानधर्मिणः प्रथमधर्मस्य तिरोभावे सत्यभिनवधर्मस्य ग्रहणं धर्मपरिणामः, यथा मृत्तिकायाः पिण्डरूप-धर्मपरित्यागेन घटरूपेण परिणमनम्। घटस्यानागतस्वरूपपरित्यागपूर्वकं वर्त्तमानघटरूपग्रहणं वर्त्तमानस्वरूपपरित्याग- पूर्वकमतीतस्वरूपस्वीकारः लक्षणपरिमाम इति। एवं तस्य अनागतातीतरूपसदृशकाललक्षणयोर-न्वयित्वेनावस्थानमवस्थापरिमा इति। गुणाः सदैव परिणामनशीलाः। अतः त्रिगुणात्मकप्रकृतेः परिणामभूताः सर्वेऽपि पदार्थाः परिवर्त्तनशीलाः भवन्ति[24]।

वस्तुतस्तु परमार्थतः एक एव परिणाम इति भाष्यकारस्याशय। परन्तु कः सः परिणाम इत्यस्मिन् विषये व्याख्याकाराणां मतैक्यं न दृश्यते। केषाञ्चित् मते अवस्थापरिणाम एव वास्तविकः। धर्मपरिणालस्तु धर्मिणः अवस्था-विशेषः। एवञ्च लक्षणपरिणामेनाऽप्येकस्याः विशिष्टावस्थायाः बोधः जायते। एतेषां मते अवस्थापरिणामे धर्मलक्षणपरिणामयोः समावेशात् धर्मिणः अवस्थापरिणा एव स्वीकार्यः। व्यासदेववाचस्पतमिश्रातयः धर्मिणः धर्मरूप एक एव परिणामः लक्षणावस्थापरिणामौ धर्मपरिणामस्यावान्तरभेदौ इति स्वीकुर्वन्ति। धर्मः धर्मिरूपम् न तु तत्वान्तरम्। धर्मपरिणामेन धर्मिसकाशात् धर्मस्य पृथक् भानम्, न तु लक्षणादिपरिणामेन। अतः धर्मिणः एकत्वात् परिणामोऽपि एक एव। स च परिणामः धर्मपरिणाम[25] इति ।

**धर्मिलक्षण-**योगदर्शने धर्मधर्मिशब्दः कार्यकारणार्थे परिभाषितः। धर्मोस्यास्तीति धर्मी इति व्युत्पत्त्या यस्य धर्म वर्त्तते सः धर्मी इत्युच्यते[26]। अतः धर्मिज्ञाननिमित्तं

---

22. (क) एतेन भूतेन्द्रियेषु धर्मक्षणावस्थापरिणामाव्याख्याताः, इति। यो. सू., ३.१३ ख) एतेन पूर्वोक्तेन .... वेदितव्य।, इति । व्या.बा., ३.१३। ग) एतेन त्रिविधेनोक्तेन.. व्याख्यातोऽवगन्तव्यः, इति। रा.मा. वृ, ३.१३।

23. व्या.भा., ३.१३

24. गुणवृत्तिर्न अपरिणम्यमाना क्षणमप्यस्ति, इति। तत्रैव।

25. (क) एक एव परिणामः त्रयोऽपि धर्मिपरिणाम एव यतो धर्मिस्वरूप एव धर्मोऽतो धर्मिपरिणाम एवैष लक्षणादिपरिणामो धर्मादिरित्यवान्तरमेव विभज्यत, इति– यो. वा., पृ. 297 ख) यथाऽर्थतएक एव धर्मपरिमामोऽस्त्यन्यौ काल्पनिकावित्यर्थः, इति– भा. पृ., 297

26. (क) एक एव परिणामः त्रयोऽपि धर्मिपरिणाम एव यतो धर्मिस्वरूप एव धर्मोऽतो धर्मिपरिणाम एवैष लक्षणादिपरिणामो धर्मादिरित्यवान्तरमेव विभज्यत, इति– यो. वा., पृ. 297 ख) यथाऽर्थतएक एव धर्मपरिमामोऽस्त्यन्यौ काल्पनिकावित्यर्थः, इति– भा. पृ., 297

अन्तर्राष्ट्रीय हिन्दी एवं सामाजिक विज्ञान शोध पत्रिका
Peer Reviewed Refereed शोध पत्रिका
ISSN: 2348–2605 Impact Factor: 6.789 Volume 10-Issue 4, (October-December 2022)

धर्मिविषयकज्ञानमावश्यकम्। अत्र शङ्का जागर्त्ति कोऽयं धर्मी इति। तत्रोच्यते - शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी[27] इति। धर्मी आधारः आश्रयो वा, तदुपरिविद्यमानः धर्मः आधेयः। धर्मशब्दः शक्तिपरकः। अयं शक्तिरूपधर्मः शक्तियुक्ते धर्मणि तादात्म्यसम्बन्धेन तिष्ठति। मृत्तिकादिद्रव्यरूपे धर्मिणि अव्यक्तरूपेण विद्यामाना चूर्णपिण्डघटादिनिर्माणयोग्यतारूपशक्तिरेव धर्मः[28]। रूचकस्वस्तिक- कटककुण्डलादिधर्माणां मध्ये बेदसत्त्वेऽपि धर्मिरूपसुवर्णस्य सर्वत्र यथा सामान्यरूपेणावस्थानम् तथा अतीतवर्त्तमानागतधर्मरूपत्रैकालिकधर्मेषु धर्मी सर्वदा अनुभूयतः (तं त्रिविधमपि.भासते, इति अथवा) धर्मिणो-द्रव्यस्य)।

एकस्यैव धर्मिणः कथमनेके परिणामाः इत्याशंकायाः समाधानार्थं सूत्रकारेणोक्तं क्रमान्यत्वं परिणामान्यत्वे हेतुः[29] इति। धर्माणां विविधत्वे धर्मी एव कारणम्। मृच्चूर्णाद् मृत्पिण्डकपालघटादीनां क्रमशः परिणामः। एकस्यैव धर्मिण अनेकत्वं लक्षणपरिणामस्यावस्थापरिणामस्य च स एव क्म परिणामस्य विविधतां प्रकटयति । एवं भावपदार्थानां नियतक्रमेण प्रतिक्षणं परिवर्तनं दृश्यते। एतेन क्रमान्यत्वात् परिणामान्यत्वं सिद्धम्। तथैव चेतसि सुखसंस्थानादिधर्माणां प्रत्यक्षेण धर्मसंस्थानशक्तिप्रभृतीनां मनुमानेन चैकान्ततः यद्यपि बोधः तथापि धर्मिरूपचित्तस्य सर्वत्रानुगम इति वृत्तिकारस्याशयः।

---

27. योे.सू.- 3.14।

28. (क) धर्मिणो– द्रव्यस्य मृदादेः, शक्तिरेव- चूर्णपिण्डघटाद्युत्पत्तिशक्तिरेव धर्मः तेषां तत्राव्यक्ततेवन भाव इति यावत्, इति। त.वै.,पृ. 308) ख) स च धर्मः शक्तिरूपपः ... इति यो. वा., पृ. 308 ग) श्कतिरेव धर्मः , इति । व्या.भा., 3.14 घ) शान्ता... धर्मशब्देनाभिधीयते, इति। रा.मा. वृ., 3.14 ।

29. (क) धर्मिणो– द्रव्यस्य मृदादेः, शक्तिरेव- चूर्णपिण्डघटाद्युत्पत्तिशक्तिरेव धर्मः तेषां तत्राव्यक्ततेवन भाव इति यावत्, इति। त.वै.,पृ. 308)
ख) स च धर्मः शक्तिरूपपः ... इति यो. वा., पृ. 308
ग) श्कतिरेव धर्मः, इति । व्या.भा. , 3.14
घ) शान्ता... धर्मशब्देनाभिधीयते, इति। रा.मा. वृ., 3.14।

अन्तर्राष्ट्रीय हिन्दी एवं सामाजिक विज्ञान शोध पत्रिका
Peer Reviewed Refereed शोध पत्रिका

ISSN: 2348–2605 Impact Factor: 6.789 Volume 10-Issue 4, (October-December 2022)

## सहायकग्रन्थसूची---

1. पातञ्जलयोगसूत्रम् डॉं रमाशंकरभट्टाचार्यः भारतीयविद्याप्रकाशन, वाराणसी, 221001
2. तत्त्ववैशारदी वाचस्पतिमिश्रः, भारतीयविद्याप्रकाशन, वाराणसी, १९८७

3. नागेजीभट्टवृत्तिः भट्टः नागेजी, जयकृष्णदासप्रकाशनम्, हरिदासगुप्ता , वाराणसी , १९७१
4. पातञ्जलियोगदर्शनम् भट्टाचार्यः, रामशङ्करः, मोतीलालवनारसीदास, दिल्ली, तृतीयसंस्करण, १९८७

5. पातञ्जलियोगदर्शनम् डॉं, सुरेन्द्र चन्द्र श्रीवास्तव, चौखम्बा संस्कतभारती, २०१२